# Shri Adi VarahI sahasranAmastotram

# શ્રીઆદિવારાહીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : vArAhIsahasranAmastotram

File name : vArAhIsahasranAmastotra.itx

Category : sahasranAma, devii, stotra, devI

Location : doc_devii

Transliterated by : Shankara shankara_2000 at yahoo.com

Proofread by : Shankara shankara_2000 at yahoo.com

Description-comments : See corresponding sahasranAmAvalI

Souce : uDDAmaratantrokte

Latest update : May 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીઆદિવારાહીસહસ્રનામસ્તોત્રમ્

ઉડ્ડામરતન્ત્રાન્તર્ગતમ્

॥ શ્રીવારાહીધ્યાનમ્ ॥

નમોઽસ્તુ દેવિ વારાહિ જયૈઙ્કારસ્વરૂપિણિ ।
જય વારાહિ વિશ્વેશિ મુખ્યવારાહિ તે નમઃ ॥ ૧॥

વારાહમુખિ વન્દે ત્વાં અન્ધે અન્ધિનિ તે નમઃ ।
સર્વદુર્ષ્ટપ્રદુષ્ટાનાં વાક્સ્તમ્ભનકરે નમઃ ॥ ૨॥

નમઃ સ્તમ્ભિનિ સ્તમ્ભે ત્વાં જૃમ્ભે જૃમ્ભિણિ તે નમઃ ।
રુન્ધે રુન્ધિનિ વન્દે ત્વાં નમો દેવેશિ મોહિનિ ॥ ૩॥

સ્વભક્તાનાં હિ સર્વેષાં સર્વકામપ્રદે નમઃ ।
બાહ્વોઃ સ્તમ્ભકરીં વન્દે જિહ્વાસ્તમ્ભનકારિણીમ્ ॥ ૪॥

સ્તમ્ભનં કુરુ શત્રૂણાં કુરુ મે શત્રુનાશનમ્ ।
શીઘ્રં વશ્યં ચ કુરુ મે યાઽગ્નૌ વાગાત્મિકા સ્થિતા ॥ ૫॥

ઠચતુષ્ટયરૂપે ત્વાં શરણં સર્વદા ભજે ।
હુમાત્મિકે ફડ્રૂપેણ જય આદ્યાનને શિવે ॥ ૬॥

દેહિ મે સકલાન્ કામાન્ વારાહિ જગદીશ્વરિ ।
નમસ્તુભ્યં નમસ્તુભ્યં નમસ્તુભ્યં નમો નમઃ ॥ ૭॥

॥ વારાહી ગાયત્રી ॥

વરાહમુખ્યૈ વિદ્મહે । દણ્ડનાથાયૈ ધીમહી ।
તન્નો અર્ઘ્રિ પ્રચોદયાત્ ॥

॥ અથ શ્રીઆદિવારાહીસહસ્રનામસ્તોત્રમ્ ॥

અથ ધ્યાનમ્ ।
વન્દે વારાહવક્ત્રાં વરમણિમકુટાં વિદ્રુમશ્રોત્રભૂષાં

હારાગ્રૈવેયતુઙ્ગસ્તનભરનમિતાં પીતકૌશેયવસ્ત્રામ્ ।
દેવીં દક્ષોર્ધ્વહસ્તે મુસલમથપરં લાઙ્ગલં વા કપાલં
વામાભ્યાં ધારયન્તીં કુવલયકલિકાં શ્યામલાં સુપ્રસન્નામ્ ॥

ઐં ગ્લૌં ઐં નમો ભગવતિ વાર્તાલિ વાર્તાલિ વારાહિ વારાહિ વરાહમુખિ
વરાહમુખિ અન્ધે અન્ધિનિ નમઃ રુન્ધે રુન્ધિનિ નમઃ જમ્ભે જમ્ભિનિ નમઃ
મોહે મોહિનિ નમઃ સ્તમ્ભે સ્તમ્ભિનિ નમઃ સર્વદુષ્ટપ્રદુષ્ટાનાં સર્વેષાં
સર્વવાક્ચિત્તચક્ષુર્મુખગતિજિહ્વાસ્તમ્ભનં કુરુ કુરુ શીઘ્રં વશ્યં
કુરુ કુરુ । ઐં ગ્લૌં ઠઃ ઠઃ ઠઃ ઠઃ હું ફટ્ સ્વાહા ।
મહાવારાહ્યં વા શ્રીપાદુકાં પૂજયામિ નમઃ ॥

દેવ્યુવાચ –
શ્રીકણ્ઠ કરુણાસિન્ધો દીનબન્ધો જગત્પતે ।
ભૂતિભૂષિતસર્વાઙ્ગ પરાત્પરતર પ્રભો ॥ ૧॥

કૃતાઞ્જલિપુટા ભૂત્વા પૃચ્છામ્યેકં દયાનિધે ।
આદ્યા યા ચિત્સ્વરૂપા યા નિર્વિકારા નિરઞ્જના ॥ ૨॥

બોધાતીતા જ્ઞાનગમ્યા કૂટસ્થાऽऽનન્દવિગ્રહા ।
અગ્રાહ્યાऽતીન્દ્રિયા શુદ્ધા નિરીહા સ્વાવભાસિકા ॥ ૩॥

ગુણાતીતા નિષ્પ્રપઞ્ચા હ્યવાઙ્મનસગોચરા ।
પ્રકૃતિર્જગદુત્પત્તિસ્થિતિસંહારકારિણી ॥ ૪॥

રક્ષાર્થે જગતાં દેવકાર્યાર્થં વા સુરદ્વિષામ્ ।
નાશાય ધત્તે સા દેહં તત્તત્કાર્યૈકસાધનમ્ ॥ ૫॥

તત્ર ભૂધરણાર્થાય યજ્ઞવિસ્તારહેતવે ।
વિદ્યુત્કેશહિરણ્યાક્ષબલાકાદિવધાય ચ ॥ ૬॥

આવિર્બભૂવ યા શક્તિર્ઘોરા ભૂદારરૂપિણી ।
વારાહી વિકટાકારા દાનવાસુરનાશિની ॥ ૭॥

સદ્યઃસિદ્ધિકરી દેવી ધોરા ઘોરતરા શિવા ।
તસ્યાઃ સહસ્રનામાખ્યં સ્તોત્રં મે સમુદીરય ॥ ૮॥

કૃપાલેશોऽસ્તિ મયિ ચેદ્ભાગ્યં મે યદિ વા ભવેત્ ।
અનુગ્રાહ્યા યદ્યહં સ્યાં તદા વદ દયાનિધે ॥ ૯॥

ઈશ્વર ઉવાચ ।
સાધુ સાધુ વરારોહે ધન્યા બહુમતાસિ મે ।
શુશ્રૂષાદિસમુત્પન્ના ભક્તિશ્રદ્ધાસમન્વિતા તવ ॥ ૧૦॥

સહસ્રનામ વારાહ્યાઃ સર્વસિદ્ધિવિધાયિ ચ ।
તવ ચેન્ન પ્રવક્ષ્યામિ પ્રિયે કસ્ય વદામ્યહમ્ ॥ ૧૧॥

કિન્તુ ગોપ્યં પ્રયત્નેન સંરક્ષ્યં પ્રાણતોઽપિ ચ ।
વિશેષતઃ કલિયુગે ન દેયં યસ્ય કસ્યચિત્ ॥

સર્વેઽન્યથા સિદ્ધિભાજો ભવિષ્યન્તિ વરાનને ॥ ૧૨॥

ૐ અસ્ય શ્રીવારાહીસહસ્રનામસ્તોત્રસ્ય મહાદેવ ઋષિઃ । અનુષ્ટુપ્છન્દઃ ।
વારાહી દેવતા । ઐં બીજમ્ । ક્રોં શક્તિઃ । હું કીલકમ્ ।
મમ સર્વાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ૐ વારાહી વામની વામા બગલા વાસવી વસુઃ ।
વૈદેહી વિરસૂર્બાલા વરદા વિષ્ણુવલ્લભા ॥ ૧૩॥

વન્દિતા વસુદા વશ્યા વ્યાત્તાસ્યા વઞ્ચિની બલા ।
વસુન્ધરા વીતિહોત્રા વીતરાગા વિહાયસી ॥ ૧૪॥

સર્વા ખનિપ્રિયા કામ્યા કમલા કાઞ્ચની રમા ।
ધૂમ્રા કપાલિની વામા કુરુકુલ્લા કલાવતી ॥ ૧૫॥

યામ્યાઽગ્નેયી ધરા ધન્યા ધર્મિણી ધ્યાનિની ધ્રુવા ।
ધૃતિર્લક્ષ્મીર્જયા તુષ્ટિઃ શક્તિર્મેધા તપસ્વિની ॥ ૧૬॥

વેધા જયા કૃતિઃ કાન્તિઃ સ્વાહા શાન્તિર્દમા રતિઃ ।
લજ્જા મતિઃ સ્મૃતિર્નિદ્રા તન્દ્રા ગૌરી શિવા સ્વધા ॥ ૧૭॥

ચણ્ડી દુર્ગાઽભયા ભીમા ભાષા ભામા ભયાનકા ।
ભૂદારા ભયાપહા ભીરુર્ભૈરવી ભઙ્ગરા ભટી ॥ ૧૮॥

ઘુર્ઘુરા ઘોષણા ઘોરા ઘોષિણી ઘોણસંયુતા ।
ઘનાધના ઘર્ઘરા ચ ઘોણયુક્તાઽઘનાશિની ॥ ૧૯॥

પૂર્વાગ્નેયી પાતુ યામ્યા વાયવ્યુત્તરવારુણી ।
ઐશાન્યૂર્ધ્વાધઃસ્થિતા ચ પૃષ્ટા દક્ષાગ્રવામગા ॥ ૨૦॥

હૃન્નાભિબ્રહ્મરન્ધ્રાર્કસ્વર્ગપાતાલભૂમિગા ।

ઐં શ્રીઃ હ્રીઃ ક્લીં તીર્થગતિઃ પ્રીતિર્ધીર્ગીઃ કલાઽવ્યયા ॥ ૨૧॥

ઋગ્યજુઃ સામરૂપા ચ પરા યાત્રિણ્યુદુમ્બરા ।
ગદાસિશક્તિચાપેષુશૂલચક્રક્રષ્ટિધારિણી ॥ ૨૨॥

જરતી યુવતી બાલા ચતુરઙ્ગબલોત્કટા ।
સત્યાક્ષરા ચાધિભેત્રી ધાત્રી પાત્રી પરા પટુઃ ॥ ૨૩॥

ક્ષેત્રજ્ઞા કમ્પિની જ્યેષ્ઠા દૂરધર્શા ધુરન્ધરા ।
માલિની માનિની માતા માનનીયા મનસ્વિની ॥ ૨૪॥

મહોત્કટા મન્યુકરી મનુરૂપા મનોજવા ।
મેદસ્વિની મદ્યરતા મધુપા મઙ્ગલાઽમરા ॥ ૨૫॥

માયા માતાઽઽમયહરી મૃડાની મહિલા મૃતિઃ ।
મહાદેવી મોહહરી મઞ્જુર્મૃત્યુઞ્જયાઽમલા ॥ ૨૬॥

માંસલા માનવા મૂલા મહારાત્રિમહાલસા ।
મૃગાઙ્કા મીનકારી સ્યાન્મહિષઘ્ની મદન્તિકા ॥ ૨૭॥

મૂર્ચ્છામોહમૃષામોઘામદમૃત્યુમલાપહા ।
સિંહર્ક્ષમહિષવ્યાઘ્રમૃગક્રોડાનના ધુની ॥ ૨૮॥

ધરિણી ધારિણી ધેનુર્ધરિત્રી ધાવની ધવા ।
ધર્મધ્વના ધ્યાનપરા ધનધાન્યધરાપ્રદા ॥ ૨૯॥

પાપદોષરિપુવ્યાધિનાશિની સિદ્ધિદાયિની ।
કલાકાષ્ઠાત્રપાપક્ષાઽહસ્ત્રુટિશ્વાસરૂપિણી ॥ ૩૦॥

સમૃદ્ધા સુભુજા રૌદ્રી રાધા રાકા રમાઽરણિઃ ।
રામા રતિઃ પ્રિયા રુષ્ટા રક્ષિણી રવિમધ્યગા ॥ ૩૧॥

રજની રમણી રેવા રઙ્કિની રઞ્જિની રમા ।
રોષા રોષવતી રૂક્ષા કરિરાજ્યપ્રદા રતા ॥ ૩૨॥

રૂક્ષા રૂપવતી રાસ્યા રુદ્રાણી રણપણ્ડિતા ।
ગઙ્ગા ચ યમુના ચૈવ સરસ્વતિસ્વસૂર્મધુઃ ॥ ૩૩॥

ગણ્ડકી તુઙ્ગભદ્રા ચ કાવેરી કૌશિકી પટુઃ ।
ખટ્વોરગવતી ચારા સહસ્રાક્ષા પ્રતર્દના ॥ ૩૪॥

સર્વજ્ઞા શાઙ્કરી શાસ્ત્રી જટાધારિણ્યયોરદા ।
યાવની સૌરભી કુબ્જા વક્રતુણ્ડા વધોદ્યતા ॥ ૩૫॥

ચન્દ્રાપીડા વેદવેદ્યા શઙ્ખિની નીલ્લઓહિતા ।
ધ્યાનાતીતાऽપરિચ્છેદ્યા મૃત્યુરૂપા ત્રિવર્ગદા ॥ ૩૬॥

અરૂપા બહુરૂપા ચ નાનારૂપા નતાનના ।
વૃષાકપિર્વૃષારૂઢા વૃષેશી વૃષવાહના ॥ ૩૭॥

વૃષપ્રિયા વૃષાવર્તા વૃષપર્વા વૃષાકૃતિઃ ।
કોદણ્ડિની નાગચૂડા ચક્ષુષ્યા પરમાર્થિકા ॥ ૩૮॥

દુર્વાસા દુર્ગ્રહા દેવી સુરાવાસા દુરારિહા ।
દુર્ગા રાધા દુર્ગહન્ત્રી દુરારાધ્યા દવીયસી ॥ ૩૯॥

દુરાવાસા દુઃપ્રહસ્તા દુઃપ્રકમ્પા દુરુહિણી ।
સુવેણી શ્રમણી શ્યામા મૃગવ્યાધાऽર્કતાપિની ॥ ૪૦॥

દુર્ગા તાર્ક્ષી પાશુપતી કૌણપી કુણપાશના ।
કપર્દિની કામકામા કમનીયા કલોજ્વલા ॥ ૪૧॥

કાસાવહૃત્કારકાની કમ્બુકણ્ઠી કૃતાગમા ।
કર્કશા કારણા કાન્તા કલ્પાऽકલ્પા કટઙ્કટા ॥ ૪૨॥

શ્મશાનનિલયા ભિન્ની ગજારુઢા ગજાપહા ।
તત્પ્રિયા તત્પરા રાયા સ્વર્ભાનુઃ કાલવઞ્ચિની ॥ ૪૩॥

શાખા વિશાખા ગોશાખા સુશાખા શેષશાખિની ।
વ્યઙ્ગા સુભાઙ્ગા વામાઙ્ગા નીલાઙ્ગાऽનઙ્ગરૂપિણી ॥ ૪૪॥

સાઙ્ગોપાઙ્ગા ચ શારઙ્ગા શુભાઙ્ગા રઙ્ગરૂપિણી ।
ભદ્રા સુભદ્રા ભદ્રાક્ષી સિંહિકા વિનતાऽદિતિઃ ॥ ૪૫॥

હૃદ્યા વદ્યા સુપદ્યા ચ ગદ્યપદ્યપ્રિયા પ્રસૂઃ ।
ચર્ચિકા ભોગવત્યમ્બા સારસી શબરી નટી ॥ ૪૬॥

યોગિની પુષ્કલાऽનન્તા પરા સાઙ્ખ્યા શચી સતી ।
નિમ્નગા નિમ્નનાભિશ્ચ સહિષ્ણુર્જાગૃતી લિપિઃ ॥ ૪૭॥

દમયન્તી દમી દણ્ડોદ્દણ્ડિની દારદાયિકા ।
દીપિની ધાવિની ધાત્રી દક્ષકન્યા દરિદ્રતી ॥ ૪૮॥

દાહિની દ્રવિણી દર્વી દણ્ડિની દણ્ડનાયિકા ।
દાનપ્રિયા દોષહન્ત્રી દુઃખદારિદ્ર્યનાશિની ॥ ૪૯ ॥

દોષદા દોષકૃદ્દોગ્ધ્રી દોહદા દેવિકાઽદના ।
દર્વીકરી દુર્વલિતા દુર્યુગાઽદ્વયવાદિની ॥ ૫૦ ॥

ચરાચરાઽનન્તવૃષ્ટિરુન્મત્તા કમલાલસા ।
તારિણી તારકાન્તારા પરાત્મા કુબ્જલોચના ॥ ૫૧ ॥

ઇન્દુર્હિરણ્યકવચા વ્યવસ્થા વ્યવસાયિકા ।
ઈશનન્દા નદી નાગી યક્ષિણી સર્પિણી વરી ॥ ૫૨ ॥

સુધા સુરા વિશ્વસહા સુવર્ણાઙ્ગદધારિણી ।
જનની પ્રીતિપાકેરુઃ સામ્રાજ્ઞી સંવિદુત્તમા ॥ ૫૩ ॥

અમેયાઽરિષ્ટદમની પિઙ્ગલા લિઙ્ગધારિણી ।
ચામુણ્ડા પ્લાવિની હાલા બૃહજ્જ્યોતિરુરુક્રમા ॥ ૫૪ ॥

સુપ્રતીકા ચ સુગ્રીવા હવ્યવાહા પ્રલાપિની ।
નભસ્યા માધવી જ્યેષ્ઠા શિશિરા જ્વાલિની રુચિઃ ॥ ૫૫ ॥

શુક્લા શુક્રા શુચા શોકા શુકી ભેકી પિકી ભકી ।
પૃષદશ્વા નભોયોની સુપ્રતીકા વિભાવરી ॥ ૫૬ ॥

ગર્વિતા ગુર્વિણી ગણ્યા ગુરુર્ગુરુતરી ગયા ।
ગન્ધર્વી ગણિકા ગુન્દ્રા ગારુડી ગોપિકાઽગ્રગા ॥ ૫૭ ॥

ગણેશી ગામિની ગન્ત્રી ગોપતિર્ગન્ધિની ગવી ।
ગર્જિતા  ગાનની ગોના ગોરક્ષા ગોવિદાં ગતિઃ ॥ ૫૮ ॥

ગ્રાથિકી ગ્રથિકૃદ્ગોષ્ઠી ગર્ભરૂપા ગુણૈષિણી ।
પારસ્કરી પાઞ્ચનદા બહુરૂપા વિરૂપિકા ॥ ૫૯ ॥

ઊહા વ્યૂહા દુરૂહા ચ સમ્મોહા મોહહારિણી ।
યજ્ઞવિગ્રહિણી યજ્ઞા યાયજૂકા યશસ્વિની ॥ ૬૦ ॥

અગ્નિષ્ઠોમોઽત્યગ્નિષ્ટોમો વાજપેયશ્ચ ષોડશી ।
પુણ્ડરીકોઽશ્વમેધશ્ચ રાજસૂયશ્ચ નાભસઃ ॥ ૬૧ ॥

સ્વિષ્ટકૃદ્બહુસૌવર્ણો ગોસવશ્ચ મહાવ્રતઃ ।

વિશ્વજિદ્બ્રહ્મયજ્ઞશ્ચ પ્રાજાપત્યઃ શિલાયવઃ ॥ ૬૨॥

અશ્વક્રાન્તો રથક્રાન્તો વિષ્ણુક્રાન્તો વિભાવસુઃ ।
સૂર્યક્રાન્તો ગજક્રાન્તો બલિભિન્નાગયજ્ઞકઃ ॥ ૬૩॥

સાવિત્રી ચાર્ધસાવિત્રી સર્વતોભદ્રવારુણઃ ।
આદિત્યામયગોદોહગવામયમૃગામયાઃ ॥ ૬૪॥

સર્પમયઃ કાલપિઞ્જઃ કૌણ્ડિન્યોપનકાહલઃ ।
અગ્નિવિદ્દ્વાદશાહઃ સ્વોપાંશુઃ સોમદોહનઃ ॥ ૬૫॥

અશ્વપ્રતિગ્રહો બર્હિરથોઽભ્યુદય ઋદ્ધિરાટ્ ।
સર્વસ્વદક્ષિણો દીક્ષા સોમાખ્યા સમિદાહ્વયઃ ॥ ૬૬॥

કઠાયનશ્ચ ગોદોહઃ સ્વાહાકારસ્તનૂનપાત્ ।
દણ્ડાપુરુષમેધશ્ચ શ્યેનો વજ ઇષુર્યમઃ ॥ ૬૭॥

અઙ્ગિરા કઙ્ગભેરુણ્ડા ચાન્દ્રાયણપરાયણા ।
જ્યોતિષ્ટોમઃ કુતો દર્શો નન્દ્યાખ્યઃ પૌર્ણમાસિકઃ ॥ ૬૮॥

ગજપ્રતિગ્રહો રાત્રિઃ સૌરભઃ શાઙ્કુલાયનઃ ।
સૌભાગ્યકૃચ્ચ કારીષો વૈતલાયનરામઠી ॥ ૬૯॥

શોચિષ્કારી નાચિકેતઃ શાન્તિકૃત્પુષ્ટિકૃત્તથા ।
વૈનતેયોચ્ચાટનૌ ચ વશીકરણમારણે ॥ ૭૦॥

ત્રૈલોક્યમોહનો વીરઃ કન્દર્પબલશાતનઃ ।
શઙ્ખચૂડો ગજાચ્છાયો રૌદ્રાખ્યો વિષ્ણુવિક્રમઃ ॥ ૭૧॥

ભૈરવઃ કવહાખ્યશ્ચાવભૃથોઽષ્ટાકપાલકઃ ।
શ્રૌષટ્ વૌષટ્ વષટ્કારઃ પાકસંસ્થા પરિશ્રુતી ॥ ૭૨॥

ચયનો નરમેધશ્ચ કારીરી રત્નદાનિકા ।
સૌત્રામણી ચ ભારુન્દા બાર્હસ્પત્યો બલઙ્ગમઃ ॥ ૭૩॥

પ્રચેતાઃ સર્વસત્રશ્ચ ગજમેધઃ કરમ્ભકઃ ।
હવિઃસંસ્થા સોમસંસ્થા પાકસંસ્થા ગરુત્મતી ॥ ૭૪॥

સત્યસૂર્યશ્ચમસઃ સ્રુક્સ્રુવોલૂખલમેક્ષણી ।
ચપલો મન્થિની મેઢી યૂપઃ પ્રાગ્વંશકુઞ્જિકા ॥ ૭૫॥

રશ્મિરંશુશ્ચ દોભ્યશ્ચ વારુણોદઃ પવિઃ કુથા ।
આપ્તોર્યામો દ્રોણકલશો મૈત્રાવરુણ આશ્વિનઃ ॥ ૭૬॥

પાત્નીવતશ્ચ મન્થી ચ હારિયોજન એવ ચ ।
પ્રતિપ્રસ્થાનશુક્રૌ ચ સામિધેની સમિત્સમા ॥ ૭૭॥

હોતાઽધ્વર્યુસ્તથોદ્ગાતા નેતા ત્વષ્ટા ચ યોત્રિકા ।
આગ્નીધ્રોઽચ્છવગાષ્ટાવગ્રાવસ્તુત્પ્રતર્દકઃ ॥ ૭૮॥

સુબ્રહ્મણ્યો બ્રાહ્મણશ્ચ મૈત્રાવરુણવારુણૌ ।
પ્રસ્તોતા પ્રતિપ્રસ્થાતા યજમાના ધ્રુવંત્રિકા ॥ ૭૯॥

આમિક્ષામીષદાજ્યં ચ હવ્યં કવ્યં ચરુઃ પયઃ ।
જુહૂદ્ધ્રુણોભૃત્ બ્રહ્મા ત્રયી ત્રેતા તરશ્વિની ॥ ૮૦॥

પુરોડાશઃ પશુકર્ષઃ પ્રેક્ષણી બ્રહ્મયજ્ઞિની ।
અગ્નિજિહ્વા દર્ભરોમા બ્રહ્મશીર્ષા મહોદરી ॥ ૮૧॥

અમૃતપ્રાશિકા નારાયણી નગ્ના દિગમ્બરા ।
ઓઙ્કારિણી ચતુર્વેદરૂપા શ્રુતિરનુલ્વણા ॥ ૮૨॥

અષ્ટાદશભુજા રમ્ભા સત્યા ગગનચારિણી ।
ભીમવક્ત્રા મહાવક્ત્રા કીર્તિરાકૃષ્ણપિઙ્ગલા ॥ ૮૩॥

કૃષ્ણમૂર્દ્ધા મહામૂર્દ્ધા ઘોરમૂર્દ્ધા ભયાનના ।
ઘોરાનના ઘોરજિહ્વા ઘોરરાવા મહાવ્રતા ॥ ૮૪॥

દીપ્તાસ્યા દીપ્તનેત્રા ચણ્ડપ્રહરણા જટી ।
સુરભી સૌનભી વીચી છાયા સન્ધ્યા ચ માંસલા ॥ ૮૫॥

કૃષ્ણા કૃષ્ણામ્બરા કૃષ્ણશાર્ઙ્ગિણી કૃષ્ણવલ્લભા ।
ત્રાસિની મોહિની દ્વેષ્યા મૃત્યુરૂપા ભયાવહા ॥ ૮૬॥

ભીષણા દાનવેન્દ્રઘ્ની કલ્પકર્ત્રી ક્ષયઙ્કરી ।
અભયા પૃથિવી સાધ્વી કેશિની વ્યાધિજન્મહા ॥ ૮૭॥

અક્ષોભ્યા હ્લાદિની કન્યા પવિત્રા રોપિણી શુભા ।
કન્યાદેવી સુરાદેવી ભીમાદેવી મદન્તિકા ॥ ૮૮॥

શાકમ્બરી મહાશ્વેતા ધૂમ્રા ધૂમ્રેશ્વરીશ્વરી ।
વીરભદ્રા મહાભદ્રા મહાદેવી મહાસુરી ॥ ૮૯॥

શ્મશાનવાસિની દીપ્તા ચિતિસંસ્થા ચિતિપ્રિયા ।
કપાલહસ્તા ખટ્વાઙ્ગી ખડ્ગિની શૂલિની હલી ॥ ૯૦॥

કાન્તારિણી મહાયોગી યોગમાર્ગા યુગગ્રહા ।
ધૂમ્રકેતુર્મહાસ્યાયુર્યુગાનાં પરિવર્તિની ॥ ૯૧॥

અઙ્ગારિણ્યઙ્કુશકરા ઘણ્ટાવર્ણા ચ ચક્રિણી ।
વેતાલી બ્રહ્મવેતાલી મહાવેતાલિકા તથા ॥ ૯૨॥

વિદ્યારાજ્ઞી મોહરાજ્ઞી મહારાજ્ઞી મહોદરી ।
ભૂતં ભવ્યં ભવિષ્યં ચ સાઙ્ખ્યં યોગસ્તતો દમઃ ॥ ૯૩॥

અધ્યાત્મં ચાધિદૈવં ચાધિભૂતાંશ એવ ચ ।
ઘણ્ટારવા વિરૂપાક્ષી શિખિચિચ્છ્રીચયપ્રિયા ॥ ૯૪॥

ખડ્ગશૂલગદાહસ્તા મહિષાસુરમર્દિની ।
માતઙ્ગી મત્તમાતઙ્ગી કૌશિકી બ્રહ્મવાદિની ॥ ૯૫॥

ઉગ્રતેજા સિદ્ધસેના જૃમ્ભિણી મોહિની તથા ।
જયા ચ વિજયા ચૈવ વિનતા કદ્રુરેવ ચ ॥ ૯૬॥

ધાત્રી વિધાત્રી વિક્રાન્તા ધ્વસ્તા મૂર્ચ્છા ચ મૂર્ચ્છની ।
દમની દામિની દમ્યા છેદિની તાપિની તપી ॥ ૯૭॥

બન્ધિની બાધિની બન્ધ્યા બોધાતીતા બુધપ્રિયા ।
હરિણી હારિણી હન્ત્રી ધરિણી ધારિણી ધરા ॥ ૯૮॥

વિસાધિની સાધિની ચ સન્ધ્યા સઙ્ગોપની પ્રિયા ।
રેવતી કાલકર્ણી ચ સિદ્ધિલક્ષ્મીરરુન્ધતી ॥ ૯૯॥

ધર્મપ્રિયા ધર્મરતિઃ ધર્મિષ્ઠા ધર્મચારિણી ।
વ્યુષ્ટિઃ ખ્યાતિઃ સિનીવાલી કુહૂઃ ઋતુમતી મૃતિઃ ॥ ૧૦૦॥

તવાષ્ટ્રી વૈરોચની મૈત્રી નીરજા કૈટભેશ્વરી ।
ભ્રમણી ભ્રામણી ભ્રામા ભ્રમરી ભ્રામરી ભ્રમા ॥ ૧૦૧॥

નિષ્કલા કલહા નીતા કૌલાકારા કલેવરા ।
વિદ્યુજ્જિહ્વા વર્ષિણી ચ હિરણ્યાક્ષનિપાતિની ॥ ૧૦૨॥

જિતકામા કામૃગયા કોલા કલ્પાઙ્ગિની કલા ।

પ્રધાના તારકા તારા હિતાત્મા હિતભેદિની ॥ ૧૦૩॥

દુરક્ષરા પરમ્બ્રહ્મ મહાતાના મહાહવા ।
વારુણી વ્યરુણી વાણી વીણા વેણી વિહઙ્ગમા ॥ ૧૦૪॥

મોદપ્રિયા મોદકિની પ્લવની પ્લાવિની પ્લુતિઃ ।
અજરા લોહિતા લાક્ષા પ્રતપ્તા વિશ્વભોજિની ॥ ૧૦૫॥

મનો બુદ્ધિરહઙ્કારઃ ક્ષેત્રજ્ઞા ક્ષેત્રપાલિકા ।
ચતુર્વેદા ચતુર્ભારા ચતુરન્તા ચરુપ્રિયા ॥ ૧૦૬॥

ચર્વિણી ચોરિણી ચારી ચાઙ્કુરી ચર્મભૈભૈરવી ।
નિર્લેપા નિષ્પ્રપઞ્ચા ચ પ્રશાન્તા નિત્યવિગ્રહા ॥ ૧૦૭॥

સ્તવ્યા સ્તવપ્રિયા વ્યાલા ગુરુરાશ્રિતવત્સલા ।
નિષ્કલઙ્કા નિરાલમ્બા નિર્દ્વન્દ્વા નિષ્પરિગ્રહા ॥ ૧૦૮॥

નિર્ગુણા નિર્મલા નિત્યા નિરીહા નિરઘા નવા ।
નિરિન્દ્રિયા નિરાભાસા નિર્મોહા નીતિનાયિકા ॥ ૧૦૯॥

નિરિન્ધના નિષ્કલા ચ લીલાકારા નિરામયા ।
મુણ્ડા વિરૂપા વિકૃતા પિઙ્ગલાક્ષી ગુણોત્તરા ॥ ૧૧૦॥

પદ્મગર્ભા મહાગર્ભા વિશ્વગર્ભા વિલક્ષણા ।
પરમાત્મા પરેશાની પરા પારા પરન્તપા ॥ ૧૧૧॥

સંસારસેતુઃ ક્રૂરાક્ષી મૂર્ચ્છા મત્તા મનુપ્રિયા ।
વિસ્મયા દુર્જયા દક્ષા તનુહન્ત્રી દયાલયા ॥ ૧૧૨॥

પરબ્રહ્માઽઽનન્દરૂપા સર્વસિદ્ધિવિધાયિની । ૐ ।
એવમુડ્ડામરતન્ત્રાન્મયોદ્ધૃત્ય પ્રકાશિતમ્ ॥ ૧૧૩॥

ગોપનીયં પ્રયત્નેન નાખ્યેયં યસ્ય કસ્યચિત્ ।
યદીચ્છસિ દ્રુતં સિદ્ધિં ઐશ્વર્યં ચિરજીવિતામ્ ॥ ૧૧૪॥

આરોગ્યં નૃપસમ્માનં તદા નામાનિ કીર્તયેત્ ।
નામ્નાં સહસ્રં વારાહ્યાઃ મયા તે સમુદીરિતમ્ ॥ ૧૧૫॥

યઃ પઠેચ્છૃણુયાદ્વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ।
અશ્વમેધસહસ્રસ્ય વાજપેયશતસ્ય ચ ॥ ૧૧૬॥

પુણ્ડરીકાયુતસ્યાપિ ફલં પાઠાત્ પ્રજાયતે ।
પઠતઃ સર્વભાવેન સર્વાઃ સ્યુઃ સિદ્ધયઃ કરે ॥ ૧૧૭॥

જાયતે મહદૈશ્વર્યં સર્વેષાં દયિતો ભવેત્ ।
ધનસારાયતે વહ્નિરગાધોઽબ્ધિઃ કણાયતે ॥ ૧૧૮॥

સિદ્ધયશ્ચ તૃણાયન્તે વિષમપ્યમૃતાયતે ।
હારાયન્તે મહાસર્પાઃ સિંહઃ ક્રીડામૃગાયતે ॥ ૧૧૯॥

દાસાયન્તે મહીપાલા જગન્મિત્રાયતેઽખિલમ્ ।
તસ્માન્નામ્નાં સહસ્રેણ સ્તુતા સા જગદમ્બિકા ।
પ્રયચ્છત્યખિલાન્ કામાન્ દેહાન્તે પરમાં ગતિમ્ ॥ ૧૨૦॥

॥ ઇતિ ઉડ્ડામરતન્ત્રાન્તર્ગતં શ્રીઆદિવારાહીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Shankara shankara underscore 2000 at yahoo.com
Proofread by Shankara, DPD

*Shri Adi VarahI sahasranAmastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*